# Shaunakopanishad

# શૌનકોપનિષત્

## Document Information

Text title : shaunakopaniShat

File name : shaunakopaniShat.itx

Category : upanishhat, vedanta

Location : doc_upanishhat

Proofread by : Sunder Hattangadi Radim Navyan radimnavyan at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : October 21, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# શૌનકોપનિષત્

ૐ દેવાસુરાઃ સંયત્તા આસન્ । તેષામિન્દ્રો ન પ્રત્યપદ્યત । તે હ વસૂનેવ પ્રાતસ્સવનેષુ પુરોધાય વ્યજિગીષન્ત । તે હ નુન્નેષુ નારાશંસેષુ ઋષીણાં યજ્ઞવાસ્ત્વભ્યાયન્ હનિષ્યામ વા એતદ્વો યદ્દેવાન્ન પરાભાવયિષ્યથેતિ । તે હ બિભ્યત એવ સ્તોકાનુદકલ્પયન્ વિજેપ્યધ્વે વાવૈતાનન્વિતિ । તે હ તત ??ર્તિમાર્ચ્છંસ્તાનન્વિતરાન્ પરાભાવયન્ । તતો હેન્દ્રોઽપશ્યત્ । સ હ ગા??વીમેવ પ્રતિસન્દિદેશ । સા હોવાચ । બિભેમિ વા એતદેતેભ્યો યથૈતત્પરાવૃતન્નિતિ । સ પ્રણવમેવાસ્યાઃ પુરોગમકરોદેષ વાવ તે ગોપ્યાયેતિ । સા હોવાચ । યદેષ પુરોગાઃ ઉદેષ મે ભાગધેયી સ્યાદિતિ । સ હોવાચ । ન હ વાવૈષ ત્વદ્ભાગધેયી ભવતિ । મહાન્વા અસ્ય મહિમા ન હ વા મહીયાંસો ભાગક્લૃપ્તિમપ્યાભજન્તીતિ । વિશ્વમિન્નુ સમન્વાલભધ્વમિતિ । સેનાન્યાસ્તુ પ્રથમજાનાપ્યાયયિષ્યસીત્યોમિતિ હોવાચ । સ હોવાચ યત્પ્રથમં નાભ્યકીર્તયો નામગ્રાહમથ નાનુવત્સ્ય ઇતિ । નામગ્રાહમેતેન સર્વમભિપદ્યન્તે । સર્વં વા એષ સર્વમશ્નોતીતિ । અક્ષરં વા એષઃ । તસ્માદોમિત્યનુજાનન્તિ । ઓમિતિ પ્રતિપદ્યન્ત ઓમિત્યભ્યાદદત ઓમિત્યભિનિધાપયન્તિ । તદેતદક્ષરં જૈત્રમભિત્વરં સર્વાણિ ભૂતાન્યભ્યાત્તં યદનેકમેકં નાનાવર્ણં નાનારૂપં નાનાશબ્દં નાનાગન્ધં નાનારસં નાનાસ્પર્શમિતિ । અથો ખલ્વાહુરિન્દ્રો વા ચૈતદક્ષરમ્ । સર્વાણિ હ વા ઇમાનિ ભૂતાન્યેતદક્ષરમન્વાયત્તાનિ સર્વે વેદાઃ સર્વે યજ્ઞા ઇત્યથ ખલ્વિન્દ્રમન્વાયત્તમિતિ ॥

સ મન્દ્રેણૈવાન્વાભક્તો વિદિદ્યુતેઽગ્જસૈવ ભ્રાતૃવ્યાનપહનાનીતિ । તસ્માન્મન્દ્રં પ્રાતઃસવનમભવદ્યદ્ગાયત્રં તદ્ગાયત્રી તદ્ગાયત્રં યદ્વસવઃ તદ્વસવ્યમ્ । સ હ પ્રણવ ઉવાચ । યદહં સર્વં ભવાનિ યદ્ગાયત્રી વૈ પુરોગાઃ તત્કિં મે સ્યાદિતિ । ગાયત્રમન્વેવ ગાયત્રીમન્વેવ ત્વા સર્વરૂપમિમં કૃત્વા હિઙ્કુર્વન્તિ । સ

હાપશ્યન્નૈતદગ્જસૈવ સર્વા રૂપાણ્યેવમભિચક્ષીરન્નિતિ । સ હાન્તત
એવાત્માનમુપસંહૃત્ય તાવદેવાગ્રાહયત્ । સ વિશ઼ૃઙ્ગ એવાભવત્ ।
તસ્માદ્વિશ઼ૃઙ્ગમેવૈતદિહાનુદ્રવન્તિ । તદાહુર્યદ્વા એતસ્ય વીર્યં
યચ્છુક્રં યજ્જ્યોતિર્યદમૃતં યદજર્યં તદવરમિતિ । તસ્માત્તત
એવાતો જ્યોતિરમૃતમજર્યં પ્રતિપદ્યન્તે । તતો હાસુરાઃ પરાભવન્ ।
સ એષ ઇન્દ્રઃ સર્વં યદ્ગાયત્રી ઉદ્ગીથો વસવઃ પ્રાતસ્સવનમિતિ ।
તદાહુઃ । સર્વં વા એતદિન્દ્રો યજ્જગદ્યથૈવેતિ ॥

તતો હાસુરાઃ પુનરેવોદયન્તિ । તે હ માધ્યન્દિનસ્યૈવ સવનસ્ય
પવમાનેષુ યજ્ઞવાસ્ત્વભ્યાયન્ । તેષાં જરિતારો બિભ્યત એવ
વસતીવરીરુપાકલ્પયન્ । તે હ તાભિરેવ જિઘાંસન્ । તેષામિન્દ્રો રુદ્રાનેવ
સેનાન્યોઽકઃ । તે હાક્ષીયન્ત । સ હ ત્રિષ્ટુભમેવ પ્રતિસન્દદત્ ।
સાબ્રવીત્ । બિભેમિ વા એતદેતેભ્યો યથૌજીયાંસો બલીયાંસ ઇમે
પરાભવન્નિતિ । સ હ પ્રણવમેવોવાચ પુરોગાયમેવારભસ્વેતિ ।
સોઽબ્રવીત્ । કિં મેઽતઃ સ્યાદિતિ । યદહં સ ત્વં મમૈવ રૂપેણ
ન્યૂંખયિષ્યન્તિ ત્વામિતિ । સ હાપશ્યત્ । સર્વ એવ ન્યૂંખયન્તો
મામભિચક્ષીરન્નિતિ । સ હ સર્વમેવાત્માનમુપસંહૃત્ય શ઼ૃઙ્ગ
એવાગૂહયત્ । સ હ વિશ઼ૃઙ્ગ એવાભવત્ । તસ્માદિત્થૈવ ન્યૂંખયન્તિ ।
તતો હાસુરાઃ પરાભાવયન્ । તસ્માદ્રુદ્રાનેવ માધ્યન્દિનં સવનં
ત્રૈષ્ટુભં ચેતિ ॥

તે હાસુરાઃ પુનરેવોદપતિષ્યન્ત । તે હ તૃતીયસ્યેહ સવનસ્ય
પવમાનેષુ યજ્ઞવાસ્ત્વભ્યાયન્ । તેષામિમે બિભ્યત એવાંશૂનુપાકલ્પયન્ ।
તે હ તૈરેવ દેવાનપાજિઘાંસન્ । તેષામિન્દ્રો જગતીમેવ પ્રતિસન્દિદેશ ।
સાબ્રવીત્ બિભેમિ વા એતદેતેભ્યો યથૌજીયાંસો બલીયાંસ ઇમે
પરાવૃતન્નિતિ । તસ્યા ઇન્દ્રઃ પ્રણવમેવ પુરોગામકરોત્ । સ હોવાચ ।
કિં મેઽતઃ સ્યાદિતિ । સ હોવાચેન્દ્રો યત્ત્વામુદ્ગીથેનોપાવનેષ્યન્તે તેનૈવ
તે કલ્પયિષ્યન્તીતિ । સેનાન્યો હિ તર્હ્યાદિત્યાનકલ્પયન્ તસ્માજ્જાગતં
તૃતીયસવનમાદિત્યાનામ્ । સ હાપશ્યદાદિત્યો વા ઉદ્ગીથોઽસૌ
ખલ્વાદિત્યો બ્રહ્મ । ન હ વા એનં મિથુ ચિદેમીતિ । સ હ સ્વેનૈવ
રૂપેણાદિત્યાનગચ્છત્ । સ હ તેનૈવ વજ્રેણાસુરાન્ પરાભાવયન્ । તદ્યત્
સ્વેનૈવ રૂપેણાવિસ્તરામગચ્છત્તત્પ્રતિષ્ઠામવિન્દત્ । પ્રતિષ્ઠા હ વા
એષા યત્પ્રણવઃ । સર્વાણિ હ વા ઇમાનિ ભૂતાનિ પ્રણવ એવ પ્રતિતિષ્ઠન્તિ ।

તસ્ય હ વા એષા પ્રતિષ્ઠા યત્રાસાવાત્માનમુપસંહૃત્યાજૂગુપત્ ।
તસ્માત્તદેવોપન્વીતેતિ તદેવોપાસીત । તદેતદૃચાભ્યુક્તમ્-

ચત્વારિ શ‍ૃઙ્ગા ત્રયો અસ્ય પાદાઃ
દ્વે શીર્ષે સપ્તહસ્તાસો અસ્ય ।
ત્રિધા બદ્ધો વૃષભો રોરવીતિ
મહો દેવો મર્ત્યાઁ આવિવેશ ॥ ઇતિ ॥

યદિમાસ્તિસ્રોથાસાવિતિ ચત્વારીતિ । યદિમે દ્વે એવાક્ષરે ત્રિભિરુપન્વન્તિ
તત્ત્રય ઇતિ । યત્પ્રત્યક્ષં તદ્વૈ ઇતિ । યદુદ્ગીથં
સપ્તભિરભિપ્રપદ્યન્તે તત્સપ્તેતિ । અથો ખલ્વાહુઃ । સપ્તભિરેનં
સ્વારયન્તીતિ । યદીમાન્ ત્રીનભિધત્તે તત્ત્રિધેતિ । યદિન્દ્ર
એવોદ્ગીથસ્તદ્વૃષભ ઇતિ । તદેતદૃચાભ્યુક્તમ્-

મરુત્વન્તં વૃષભં વાવૃધાનમ્ ।
યદ્દ્રાવયન્તિ તદ્રોરવીતિ ॥

યદેષ સર્વાણિ ભૂતાન્યનુપ્રવિષ્ટસ્તન્મર્ત્યાઁ આવિવેશેતિ ।
તસ્માદોમિત્યેકાક્ષરમુદ્ગીથમુપાસીતેત્યાહ ભગવાન્ શૌનકઃ શૌનક ઇતિ ॥

ઇતિ શૌનકોપનિષત્ સમાપ્તા ।

Proofread by Sunder Hattangadi,
Radim Navyan radimnavyan at gmail.com

*Shaunakopanishad*
pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*